# खुदीरामः बोझः



श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् - गुजरातम्

Scanned with CamScanner

# ।। खुदीरामः बोझः ।।

**प्रेरणास्रोतांसि एवं मार्गदर्शकाः**

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

**लेखकः**

के. पी. महेता

**अनुवादकौ**

प्रा. ललितः पटेलः

श्री गोपाल उपाध्यायः

**प्रकाशनम्**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info



Scanned with CamScanner

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

परामर्शनसमितिः -

डॉ. नरेन्द्रकुमार पण्ड्या

डॉ. देवेन्द्रनाथः पाण्डेयः

प्रा. ललितः पटेलः

डॉ. भावप्रकाशः गांधी

कार्यसंयोजकः -

श्री दशरथः जादवः

(उपकुलसचिवः)

प्रथमं संस्करणम् - फरवरी - २०१३

ISBN -13 978-81-925721-5-4

प्रतयः - ३००

मूल्यम् - ५०/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्



Scanned with CamScanner

# ।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**-अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः **'सरफरोशश्रेण्याः'** कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्चा-प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **के. पी. महेता** रचितोऽयं **प्रा. ललितः पटेलः** तथा **श्री गोपाल उपाध्यायाभ्याम्** अनुदितोऽयं **खुदीरामः बोझः** नामधेयः ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

*प्रो. पंकज एल. जानी*

**कुलपतिः**



Scanned with CamScanner

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | बङ्गभङ्ग - आन्दोलनम् । | ६ |
| २. | बाल्यकाल: । | ११ |
| ३. | योजनां ददातु एवं भुशुण्डीं ददातु । | १९ |
| ४. | क्रान्तिवीराणां गुप्तगोष्ठी । | २३ |
| ५. | खुदीरामस्य कोटाई एवं तामुलकयात्रा । | २५ |
| ६. | किंग्सफोर्ड मारयतु । | २८ |
| ७. | गच्छन्तु, माता दुर्गा युष्मभ्यं यश: आप्नुयात् । | ३६ |
| ८. | मुजफ्फरस्य तथा किंग्सफोर्डस्य केटन (रथविशेष:) | ३९ |
| ९. | केटनस्य (रथविशेषस्य) उपरि आक्रमणम् । | ४४ |
| १०. | किंग्सफोर्ड: सुरक्षित: | ४८ |
| ११. | प्रफुल्लचन्द्रचाके: आत्मसमर्पणम् । | ५२ |
| १२. | उत्बन्धनस्य स्थाने । | ५५ |
| १३. | देशाय हुतात्मन: कदापि न म्रियन्ते । | ६३ |

# बङ्गभङ्गः आन्दोलनम्

भारतस्य पूर्वदिशि सूर्यः प्रकाशते स्म। पक्षिणां वृन्दानि उड्डयनं कुर्वन्ति स्म। तेषां कण्ठेभ्यः मधुरः ध्वनिः निर्गच्छति स्म। सूर्यरश्मयः शरदृतोः शैत्यं दूरीकुर्वन्ति स्म। वातावरणे महती उष्णता प्रसरति स्म। ग्राम - ग्रामतः धेनुवृन्दानि वनं प्रति प्रस्थानं कृतवन्ति आसन्। प्रातः प्रत्येक जीवने नवजीवनं पूरयति स्म।

एतस्मिन् समये एकः विशालः जनसमूहः पुण्यसलिलां भागीरथीं प्रति गच्छन् आसीत्। सहस्रजनानां संदर्भः आसीत्। बालकाः, युवानः, युवतयः, वृद्धाः, मातरः, सर्वेऽपि गङ्गां प्रति गच्छन्तः आसन्।

सर्वस्य अग्रे श्वेतश्मश्रुलः, लम्बकेशः, तप्तकाञ्चनमुखः, महामुनिः, विशालकायः कश्चन जनः आसीत्। असुरसंहाराय युद्धरतः भगवान् पिनाकपाणिः इव सः आसीत्। अस्य प्रत्येकं चरणं दृढतापूर्वकम् उच्चलति स्म। तस्य चलने न शिथिलता आसीत्, न च शीघ्रता। नेत्रे स्वप्नानां प्राचुर्यम् आसीत्।

एतस्याः व्यक्तेः पृष्ठे वारं वारं जयघोषः भवति स्म। कर्णविहारगर्जनाः श्रूयन्ते स्म। किन्तु इमं महापुरुषं किमपि न स्पृशति स्म। अस्य पृष्ठे स्थितः जनसमुदायः यथा यथा अग्रतः भवति स्म तथा तथा विशालायते स्म।

जनसमुदायः अयं कलकत्तामहानगरस्य आसीत्। तेषां मार्गः गङ्गातटं प्रति आसीत्। यः जनसमुदायः अग्रेसरः आसीत्, तस्य नेता आसीत् रवीन्द्रनाथः टागोरः।

हिन्दुस्तानस्य वाईसरोट-लोर्ड कर्झनः दृढः, चतुरः, शठः, राजनीतौ अष्टाङ्गखेलकः चासीत्। हिन्दुस्तानस्य वाईसरोयरूपेण सत्तां स्वीकृत्य तेन अवलोकितं यत् - हिन्दुस्ताने प्रजाकीय - आन्दोलनेषु प्रमुखः वर्तते बङ्गालः। बङ्गालेन यत्किमपि प्राप्तं तत्सर्वं स्वयंभु। तस्य साहित्ये वैदेशिकस्य साहित्यस्य कलङ्कः न आसीत्। विद्या - तेजस्विता - गौरव- स्वातन्त्र्य-कृषि-उद्योग-साहित्य-कलादिषु क्षेत्रेषु बङ्गालः अग्रेसरः आसीत्। नेतृत्त्वाय शक्तिरासीत् बङ्गाले। शिक्षाक्षेत्रे अपि बङ्गालः सर्वस्मात् अग्रे आसीत्। राजकारणम् अपि बङ्गालवत् कस्मिन्नपि प्रान्ते विकसितं न आसीत्।



Scanned with CamScanner